# संस्कृत-वार्ता:

**दिनाङ्क:- 01.06.2024**

**प्रात:- 06:55**

**<u>निर्वाचनप्रचार:</u>**

**लोकसभानिर्वाचनस्य सप्तमस्य अन्तिमचरणस्य च सर्वा: सज्जा: सम्पूरिता:। सप्तराज्येषु विस्तृतानि सप्तपञ्चाशत् संसदीयक्षेत्राणि, एकं केन्द्रशासितक्षेत्रं च अस्मिन् चरणीयमतदाने संलग्नानि सन्ति। मतदानञ्च अद्य प्रात: सप्तवादने आरप्स्यते। एतेषु क्षेत्रेषु उत्तरप्रदेश-पञ्जाबयो: च त्रयोदश-त्रयोदश, पश्चिमबङ्गस्य नव, बिहारस्य अष्ट, ओडिशाया: षड्, हिमाचलप्रदेशस्य चत्वारि, झारखण्डस्य त्रीणि, चण्डीगढ केन्द्रशासितक्षेत्रस्य एकं आसन्दनानि च सन्ति ओडिशाराज्यस्य द्विचत्वारिंशत् विधानसभासनानां अपि अस्मिन् चरणे युगपत् एव निर्वाचनं भविष्यन्ति। सप्तपञ्चाशत् लोकसभासनेभ्य आहत्य चतुरधिकनवशतम् अभ्यर्थिन: सन्ति। निर्वाचनआयोगेन स्वतन्त्रं निष्पक्षं च मतदानं सुनिश्चेतुं विस्तृतव्यवस्था: कृता: सन्ति। निर्वाचनाधिकारिभ्य: निर्देश: प्रदत्त: यत् ते तप्ततापेन उत्पद्यमानानां समाह्वानानां न्यूनीकरणाय, मतदातृणां, निर्वाचनाधिकारिणां च स्वास्थ्य-रक्षणाय च उपाया: कार्यान्विता: भवेयु:। सुचारु-रीत्या निर्वाचन प्रक्रिया सञ्चालनाय नवति सहस्राधिक दश लक्षं यावत् निर्वाचनाधिकारिण: नियोजिता: सन्ति। षष्ठी लक्षाधिक दश कोटीतोप्यधिका: मतदातार: अभ्यर्थीनां भाग्यस्य निर्णयं करिष्यन्ति।**

**<u>सकलराष्ट्रीयउत्पाद-वृद्धि:</u>**

**वित्तीयवर्षे द्वाविंशत्यधिक द्विसहस्र, त्रयोविंशत्यधिक द्विसहस्र तम वर्षायो: मध्ये सप्त प्रतिशतस्य वृद्धे: अपेक्षया भारतस्य मौलिक जीडीपी इति त्रयोविंशत्यधिक द्विसहस्र, चतुर्विंशत्यधिक द्विसहस्र तमे वित्तीयवर्षे अष्ट दशमलव द्वि प्रतिशतं यावत् वृद्धि: भविष्यतीति अनुमानम् अस्ति। सांख्यिकी-कार्यक्रम-कार्यन्वयन-मन्त्रालयस्य अनुसारी मौलिक जीडीपी इति सामान्यमूल्येषु त्रयोविंशत्यधिक द्विसहस्र, चतुर्विंशत्यधिक द्विसहस्र तमे वर्षे त्रिसप्तत्यधिकैक शत् लक्षकोटिरूप्यकाणां स्तरं प्राप्तुं अनुमानितम् अस्ति।**

**<u>प्रधानमंत्री-आपत्</u>**

**रेमल चक्रवातानन्तरं असम, मणिपुर, मेघालय, मिजोरम, त्रिपुरा, पश्चिम बंगाल इत्येतेषु प्राकृतिक-आपत्सु विषये प्रधान मन्त्रिणा नरेन्द्रमोदिना चिन्ता प्रकटिता। एकस्मिन् सामाजिकान्तरजाल सन्देशे श्रीमोदी अवदत् यत् तस्य विचारा: प्रार्थना: च तत्र ये प्रभाविता: सन्ति तेषां सर्वेषां कृते अस्ति। प्रधानमन्त्रिणा उक्तं यत्, स: प्रचलितस्थिते: अवलोकनं कृतवान् तथा च केन्द्रसर्वकारेण राज्येभ्य: सर्वविध सहयोगाय आश्वासितम्। गृहमन्त्री अमितशाह: उक्तवान् यत् स: राज्यानाम् मुख्यमन्त्रिभि: सह अपि वार्तालापं कृत्वा स्थिते: अवलोकनं कृतवान्।**

**<u>अमरीका-आयुधा:</u>**

**अमरीकादेशीय: राष्ट्रपति: जो. बाइडन प्रशासने यूक्रनाय अमरीकाद्वारा प्रदत्तात् आयुधान् रूसदेशस्य अन्तस्थिरक्षेत्रेषु आक्रमणाय अनुमति: प्रदत्ता। सञ्चारसूचनानुसारि खार्किवक्षेत्रे रूसदेशस्य सुदृढस्थितिं युद्धरणे च यूक्रेनस्य प्रतिकूलपरिस्थितिं अवलोक्य निर्णयोऽयं निर्णीत:।**

पेरिस ओलम्पिक

विश्वचैम्पियनशिप इत्यस्य कांस्यपदकविजेता निशांतदेवः प्रथमः भारतीयः पुरुषः अभवत् यः चतुर्विंशत्यधिक द्विसहस्र तम वर्षस्य पेरिस् ओलम्पिकक्रीडायां प्रवेशं प्राप्तवान्। ह्यः बैंकॉक्-नगरे विश्व मुष्टामुष्टि-निर्णायक-क्रीडायां पुरुषाणां एकसप्तति किलोग्राम-मित वर्गस्य प्रागुपंत्य-क्रीडायां मोल्डोवा-देशस्य वासिल-सेबोटारी-इत्येतमं पञ्च-शून्यं इत्यंकान्तरालेन पराजयित्वा निशान्तः पेरिस्-ओलम्पिक-क्रीडायां प्रवेशं कृतवान्।

।। इति वार्ता:।।